# अध्याय : ५ chapter-5

नारद उवाच ।।
ततोऽहं धर्मवर्माणं प्रोच्य[1] तिष्ठद्धनं त्वयि ।।
कृत्यकाले ग्रहीष्यामीत्यागमं रैवतं गिरिम्[2] ।। १

आसं प्रमुदितश्चाहं पश्यंस्तं गिरिसत्तमम् ।।
आह्वयमानं नरान्साधून्भूमेर्भुजमिवोच्छ्रितम् ।। २

यस्मिन्नानाविधा वृक्षाः प्रकाशंते[3] समंततः[4] ।।
सार्धं गृहपतिं प्राप्य पुत्रभार्यादयो यथा ।। ३

मुदिता यत्र संतृप्ता वाशंति कोकिलादयः ।।
सद्गुरोर्ज्ञान संपन्ना यथा शिष्यगणा भुवि ।। ४

यत्र तप्त्वा तपो मर्त्या यथेप्सितमवाप्नुयुः[5] ।।
श्री महादेवमासाद्य ऋकतो यद्वन्मनोरथम् ।। ५

तस्या हं च गिरेः पार्श्व समासाद्य महाशिलाम् ।।
शीतसौरम्यमंदेन प्रीणतोऽचिंतयं हृदि ।। ६

तावन्मया स्थानमाप्तं यदतीव सुदुर्लभम् ।।
इदानीं ब्राह्मणार्थोऽहं कुर्वे तावदुपक्रमम् ।। ७

---

१ ब प्रोक्त्वा
२ ब गिरि
३ अ, ब प्रकाशे
४ अ, ब समे ततः
५ अ तः

ब्राह्मणाश्च विलोकया मे ये हि पात्रतमा[1] मताः ।।
तथा हि चात्र श्रूयते वचांसि श्रुतिवादिनाम् ।। ८

न जलोत्तरणे शक्ता वृद्धाङ्गीः कर्णवर्जिता[2] ।।
तद्वच्छ्रेष्ठोऽप्यनाचारी विप्रो नोद्धरणक्षमः ।। ९

ब्राह्मणो ह्यनधीयानस्तृणाग्निरिव शाम्यति ।।
तस्मै हव्यं न दातव्यं न हि भस्मनि हूयते ।। १०

दानपात्रमतिक्रम्य यदपात्रे प्रदीयते ।।
तद्दत्तं गामतिक्रम्य गर्दभस्य गवाह्निकम् ।। ११

ऊषरे वापितं बीजं भिन्नभाण्डे च गोदुहम्[3] ।।
भस्मनीहुतं हव्यं मूर्खे दानमशाश्वतम् ।। १२

विधिहीने तथाऽपात्रे यो ददाति प्रतिग्रहम् ।।
न केवलं हि तद्याति शेषं पुण्यं प्रणश्यति ।। १३

भुराप्ता गौस्तथा भोगाः[4] सुवर्णं देहमेव च ।।
अश्वश्चेक्षस्तथा वासो धृतं[5] तेजस्तिलाः प्रजाः ।। १४

---

१ अ, ब पात्रतमो
२ ब कर्मवर्जिता
३ अ प्रतौ इत्थंयं पाठः नास्ति
४ अ, ब भोगान
५ ब वृतं

घ्नंति तस्मादविद्वांस्तुबिभियाच्च प्रतिग्रहात् ।।
स्वल्पकेनाप्यविद्वांस्तु पंके गौरिवसीदति ।। १५

तस्माये गूढतपसो गूढस्वाध्यायसाधका: ।।
स्वदारनिरता: शांतास्तेषु दत्तं सदाऽक्षयम् ।। १६

देशे कालश्च उपायेन द्रव्यं श्रद्धासमन्वितम् ।।
पात्रे प्रदीयते यत्तत्सकलं धर्मलक्षणम् ।। १७

न विद्या[1] केवलया तपसावापि पात्रता ।।
यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते ।। १८

तेषां त्रयाणां मध्ये च विद्यामुख्यो महागुण:[2] ।।
विद्यां विनांधवद्विप्राश्चक्षुष्मंतो हि ते मता: ।। १९

तस्माच्चक्षुष्मतो विद्वान्देशे देशे परीक्षयेत्[3] ।।
प्रश्नान्ये मम वक्ष्यंति तेभ्यो दास्याम्यहं तत: ।। २०

इति संचिंत्य मनसातस्य देशात्समुष्यित: ।।
आश्रमेषु महर्षीणां विचराम्यस्मि फाल्गुन ।। २१

---

१ ब विद्या
२ अ महान गुण:
३ अ परीक्षये

इमाञ्छ्लोकान्गायमानः प्रश्नरूपाञ्छृणुष्व तान् ॥
मातृकां को विजानाति कर्तिधा[1]कीदृशाक्षराम् ॥ २२

पंचपंचाद्भुतं गेहं को विजानाति वा द्विजः ॥
बहुरूपां स्त्रियं कर्तुमेकरूपां च वेत्तिकः ॥ २३

को वा चित्रकथाबंधं वेत्ति संसारगोचरः ॥
को वार्णवमहाग्राहं वेत्ति विद्यापरायणः ॥ २४

को वाष्टविधं ब्राह्मण्यं वेत्ति ब्राह्मणसत्तमः ॥
युगानां च चतुर्णां वा को मूल दिवसान्वदेत् ॥ २५

चतुर्दशमनूनां वा मूलवासरं वेत्ति कः ॥
कस्मिंश्चैव दिने प्रापपूर्वं[2] वा भास्करो रथम् ॥ २६

उद्वेजयति भूतानि कृष्णाहिरिव वेत्तिकः ॥
को वास्मिन्घोरसंसारे दक्षदक्षतमो भवेत्[3] ॥ २७

पंथानावपि[4] द्वौ कश्चिद्वेत्ति वक्ति च ब्राह्मणः ॥
इति मे द्वादश प्रश्नान्ये विदुर्ब्राह्मणोत्तमाः ॥ २८

---

१ अ वा
२ ब प्राप्य
३ ब भवत
४ ब यथाना

ते मे पूज्यतमास्तेषाम् हमाराधकश्चिरम् ।।
इत्यहं गायमानो वै भ्रमितः सकलां महीम् ।। २९

ते चाद्दुर्दुःखदाः ख्याताः प्रश्नास्ते कुर्महे नमः ।।
इत्यहं सकलां पृथ्वीं विचिंत्यालब्ध ब्राह्मणः ।। ३०

हिमाद्रि शिखरासीनो भूयश्चिंतामवाप्तवान् ।।
सर्वे विलोकिताः विप्राः किंमतः[1] कर्तुमुत्सहे ।। ३१

ततो मे चिंतयानस्य पुनर्जाता मतिस्त्वियम् ।।
अद्यापि न गतश्चाहं कलाप[2] ग्राममुत्तमम् ।। ३२

यस्मिन्विप्राः संवसंति मूर्तानीव तपांसि च ।।
चतुराशीति[3] साहस्त्राः श्रुताध्ययन शालिनः ।। ३३

स्थाने तस्मिन्गमिष्यामी त्युक्ताहं चलितस्तदा ।।
खेचरो हिममाक्रम्य परं पारंगतस्ततः ।। ३४

अद्राक्षं पुण्यभूमिस्थं ग्रामरत्नमहं महत्[4] ।।
शतयोजन विस्तीर्णं नानावृक्षसमाकुलम् ।। ३५

---

१ अ क्मिुतः
२ अ, ब कल्पग्राम
३ अ सीति
४ अ हितत्

यत्र पुण्यवतां संति शतशः प्रवराश्रमाः ।।
सर्वेषामपि जीवानां यत्रान्योन्यं न दुष्टता ।। ३६

यज्ञभाजां मुनीनां यदुपकारैकरं सदा ।।
सतां धर्मवतां यद्वदुपकारी न शाम्यति ।। ३७

[1]मुनीनां यत्र परमं स्थानं चाप्यविनाशकृत ।।
[2]स्वाहास्वधावषट्कारहन्तकारी न नश्यति ।। ३८

यत्र कृतयुगस्यार्थं बीजं पार्थावशिक्ष्यते ।।
सूर्यस्य सोमवंशस्य ब्राह्मणानां तथैव च ।। ३९

स्थानकं तत्समासाद्य प्रविष्टोऽहं द्विजाश्रमान् ।।
तत्र ते विविधान्वादान्विवदंते द्विजोत्तमाः ।। ४०

परस्परं चिंतयाना वेदा मूर्तिधरा यथा ।।
तत्र मेधाविनः केचिदर्थमन्यैः प्रपूजितम् ।। ४१

विचिक्षुर्महात्मानो न भोगतमिवाभिष्याम् ।।
तत्राहं करमुद्यम्य प्रावोचं पूर्यतां द्विजाः ।। ४२

---

१ - २ अ. ब मुनीनां ........ कृत ।।
स्वाहा ........ नश्यति ।।
प्रती. इत्ययं श्लोकः नास्ति ।

काकारावैः किमेतैर्वो यद्यस्ति ज्ञानशालिता ।।
व्याकुरुध्वं ततः प्रश्नान्मम दुर्विग्राहान्बहून्[1] ।। ४३

ब्राह्मणा ऊचुः ।।
वद ब्राह्मण प्रश्नान्स्वांश्छ्रुत्वाऽऽधास्यामहे वयम् ।।
परमो ह्यैष नो लाभः प्रश्नान्पृच्छति यद्भवान् ।। ४४

अहं पूर्विकया ते वै न्यषेधंत परस्परम् ।।
अहं पूर्वमहं पूर्वमिति वीरा[2] यथा रणे ।। ४५

ततस्तान ब्रुवं प्रश्नानहं द्वादश पूर्वकान्[3] ।।
श्रुत्वा ते मामवोचंत लीलायंतो मुनीश्वराः ।। ४६

किं ते द्विजबालप्रश्नैरमीभिः स्वल्पकैरपि[4] ।।
अस्माकं यन्नि हीनं त्वं मन्यसे स ब्रवीत्वमून् ।। ४७

ततोति विस्मितश्चाहं मन्यमानः कृतार्थताम् ।।
तेषां निहीनं संचिंत्य प्रावोचं प्रब्रवीत्वयम् ।। ४८

ततः सुतनुनामा स बालोऽबालोऽभ्युवाच माम् ।।
मम मदायते[5] वाणी प्रश्नैः स्वल्पैस्तवद्विज ।। ४९

---

१ अ मून्
२ ब रीवा
३ अ पूर्वकान् ब वर्ष्णकान्
४ अ कैरित्ति ।।
५ ब मंदीयते

सुतनुरुवाच ॥[1]
अक्षरास्तु द्विषं चाशन्मातृकायाः प्रकीर्तिताः ॥ ५०

ॐकार:[2] प्रथमस्तत्र चतुर्दश स्वरास्तथा ॥
स्पर्शाश्चैव त्रयस्त्रिंशदनुस्वारस्तथैव च ॥ ५१

विसर्ज्जनीयश्च क परो जिह्वामूलीय एव च ॥
उपध्मानीय एवापि द्विपंचाशैदभी स्मृताः ॥ ५२

इति ते कथिता संख्या अर्थं चैषां शृणु द्विज ॥
अस्मिन्नर्थे चेति हासं तव वक्ष्यामि यः पुरा ॥ ५३

मिथिलायां प्रवृत्तोऽभूद्ब्राह्मणस्य निवेशने ॥
मिथिलायां पुरा पुर्यां ब्राह्मणः कौथुमाभिधः[3] ॥ ५४

येन विद्याः प्रपठिताः वर्तते भुवि या द्विज ॥
एक त्रिंशत्सहस्त्राणि वर्षाणां स कृतादरः ॥ ५५

क्षणमप्यनवच्छिन्नं पठित्वा गेहवानभूत् ॥
ततः केनापि कालेन कौथुमस्याभवत्सुतः ॥ ५६

---

१ ब सुतनुवाच
२ अ। ॐकार
३ ब भिधा ॥

जडवद्वर्तमानः स मातृकां प्रत्यपद्यत ।।
पठित्वा मातृकामन्यन्नाध्येति स कर्हिचन ।। ५७

ततः पिता खिन्नरूपी[1] जडं तं समभाषत ।।
अधीष्व पुत्रकाधीष्व तव दास्यामि मोदकान्[2] ।। ५८

अथान्यस्मै प्रदास्यामि कर्णावुत्पाटयामि ते ।। ५९

पुत्र उवाच ।।
तात किं मोदकार्थाय पठ्यते लोभहेतवे ।।
पठनं नाम सत्पुंसां परमार्थं हि तत्स्मृतम् ।। ६०

कौथुम उवाच ।।
एवं ते वदमानस्य आयुर्भवतु ब्राह्मणः[3] ।।
साध्वी बुद्धिरियं तेऽस्तु कुतो नाध्येष्यतः परम् ।। ६१

पुत्र उवाच ।।
तात सर्वं परिज्ञेयं ज्ञातमत्रैव वै यतः ।।
ततः परं कंठशोषाः किमर्थं क्रियते वद ।। ६२

पितोवाच ।।[4]
विचित्रं भाषसे बालज्ञातोऽत्रार्थश्च कस्त्वया ।।
ब्रूहि ब्रूहि पुनर्वत्स श्रोतुमिच्छामि ते चिरम् ।। ६३

---

१ ब रूपो
२ अ, ब नादकान् ।।
३ अ प्रतौ "पुत्रकः" इति स्यात् । न तु ब्राह्मणः
४ ब पिताऊ ।।

पुत्र उवाच ।।

एकत्रिंशत्सहस्त्राणि पठित्वापि[1] त्वया पितः ।।
नानातर्कन्भ्रांतिरेव संधिता[2] मनसिस्वके ।। ६४

अयमर्यं वायमिति धर्मौ यौ दर्शनोदितः ।।
तेषु वातायते[3] चैतस्तव तन्नाशयामि ते ।। ६५

उपदेशं पठस्यैव नैवार्थश्री सितत्त्ववतः ।।
पाठमात्रा हि ये विप्रा द्विपदाः पशवो हिते ।। ६६

तत्ते ब्रवीमि तद्वाक्यं मोहमार्तंडमद्भूतम् ।। ६७

अकारः[4] कथितो ब्रह्मा उकारो विष्णुरुच्यते ।।
मकारश्च स्मृतो रुद्रस्त्रयश्चेति गुणाः स्मृताः ।। ६८

अर्धमात्रा च या मूर्ध्नि परमः स सदाशिवः ।।
एवमोंकार माहात्म्यं श्रुतिरेषा सनातनी ।। ६९

ॐकारस्य च माहात्म्यं याथात्म्येन न शक्यते ।।
वर्षाणामयुतेनापि ग्रंथकोटिभिरेवच ।। ७०

---

१ अ. ब पठतापि
२ अ. ब साधिता
३ ब वालायते
४ अ आकारः

पुनर्यत्सार सर्वस्वं प्रोक्तं तच्छ्रूयतां परम् ।।
अः कारांता[1] अकाराद्या मनवस्ते चतुर्दश ।। ७१

स्वायंभुवश्च स्वारोचिरौत्तमौ रैवतस्तथा ।।
तामसश्चाक्षुषः षष्ठस्तया वैवस्वतोऽधुना ।। ७२

सावर्णिर्ब्रह्मसावर्णी रुद्रसावर्णिरेव च ।।
दक्षसावर्णी रैवापि धर्म सावर्णिरेव च ।। ७३

रौच्यौ भौत्यस्तथा चापि मनवोऽमी चतुर्दश[2] ।।
श्वेतः पांडुस्तथा रक्तस्ताम्रः पीतश्चकापिलः ।। ७४

कृष्णः श्यामस्तया धूम्रः सुपिशंगः पिशंगकः ।।
त्रिवर्णः शबलो वर्णैः कर्कधुर इति क्रमात् ।। ७५

वैवस्वतः क्षकारश्च तात कृष्णः प्रद्रश्यते[3] ।।
ककाराधा हकारांतास्त्रय स्त्रिंशच्च देवता ः ।। ७६

ककाराद्याष्ठकारांताः आदित्या द्वादश स्मृताः ।।
धाता मित्रोऽर्यमा शक्रो वरुणाश्चांशुरेव च ।। ७७

---

१ ब ऋकारांता
२ अ॰ ब्र चतुर्दश
३ अ प्रपश्यते ब प्रपद्यते

[1]भगो विवस्वान्पूषा च सविता दशमस्तथा ।।
[2]एकादशस्तथा त्वष्टा विष्णुर्द्वादश उच्यते ।। ७८

[3]जघन्यजः स सर्वेषामादित्यानां गुणाधिकः ।।
ॐककाराधा बकरांता रुद्राश्चैकादशैव तु[4] ।। ७९

[5]कपाली पिंगलो भीमो विरूपाक्षो विलोहितः ।।
[6]अजकः शासनः शास्ता शंभुश्चण्डो भवस्तथा ।। ८०

भकाराद्याः षकारांता अष्टौ हि वसवो मताः ।।
ध्रुवो धोरश्च सोमश्च आपश्चैव नलोऽनिलः ।। ८१

प्रत्यूषाश्च प्रभासश्च अष्टौ ते वसवः स्मृताः ।।
सौ हश्चेत्यश्विनौ ख्यातौ त्रयस्त्रिंशदिमे स्मृताः ।। ८२

अनुस्वारो विसर्गश्च जिह्वामूलीय एव च ।।
उपध्मानीय इत्येते जरायुजास्तथांडजाः ।। ८३

स्वेदजाश्चोद्भिजाश्चेति तत जीवाः प्रकीर्तिताः ।।
भावार्थः कथितश्चायं तत्त्वार्थं शृणु सांप्रतम् ।। ८४

---

१ २ ३ अ भगो ......... तथा"
एका ......... यते"
जघ ......... धिक"
अ प्रतौ अ इत्ययं श्लोकाः नास्ति ।

४ अ "हि" व "ते"

५-६ अ कपाली ....... हितः ।।
अजकः ........ तथा ।।
अ प्रतौ इत्ययं श्लोकः नास्ति ।

ये पुमांसस्त्वमून्देवान्समाश्रित्य क्रियापराः ॥
अर्धमात्रात्मके नित्ये पदे लीनास्त एव हि ॥ ८५

चतुर्णां जीवयोनीनां तदैव परिमुच्चयते ॥
यदाभून्मनसा वाचा कर्मणा च यजेत्सुरान् ॥ ८६

यस्मिञ्छास्त्रे त्वमी देवा मानिता नैव पापिभिः ॥
तच्छास्त्रं[1] हि न मंतव्यं यदि ब्रह्मास्वयं वदेत् ॥ ८७

अमी च देवाः सर्वत्र श्रौते मार्गे प्रतिष्ठिताः ॥
पाषाण्डशास्त्रे सर्वत्र निषिद्धाः[2] पाप कर्मभिः ॥ ८८

तदमुन्ये व्यतिक्रम्य तपो दानमथो जपम् ॥
प्रकुर्वंति दुरात्मानो वेपंते मरुतः पथि ॥ ८९

अहो मोहस्य माहात्म्यं पश्यताविजितात्मनाम् ॥
पठंति मातृको पापा मन्यंते न सुरानिह[3] ॥ ९०

सुतनुरुवाच ॥
इति तस्य वचः श्रुत्वा पिताभूदति विस्मितः ॥
पप्रच्छच बहून्प्रश्नान्सौप्य वादीत्तथा तथा ॥ ९१

---

१ अ तत् शास्त्रं
२ ब निषित्वा
३ ब सुरानिति

मयापि तव प्रोक्तोऽयं मातृकाप्रश्न उत्तमः ।।
द्वितीयं शृणु तं प्रश्नं पंचपंचाद्भुतं गृहम् ।। ९२

पंचभूतानि पञ्चैव कर्म ज्ञानेन्द्रियाणि च ।।
पंच पंचापि विषया मनोबुद्ध्यहमेव च ।। ९३

प्रकृतिः पुरुषश्चैव पञ्चविंश सदाशिवः ।।
पञ्चपञ्चभिरेतैस्तु निष्पन्नं गृहमुच्यते ।। ९४

देहमेतद्विदं वेद तत्त्वतो यात्यसौ शिवम् ।।
बहुरूपां स्त्रियं प्राहुर्बुद्धिं वेदांतवादिनः ।। ९५

सा हि नानार्थभजनान्नानारूपं प्रपद्यते ।।
धर्मस्यैकस्य संयोगाद्बहुधाप्येकिकैवसा ।। ९६

इति यो वेद तत्त्वार्थं नासौ नरकमाप्नुयात् ।।
मुनिभिर्यच्च न प्रोक्तं यन्न मन्यैत दैवतात्[1] ।। ९७

वचनं तद्बुधाः प्राहुर्बंधे चित्रकथं त्विति ।।
यच्चे कामान्वितं वाक्यं पंचमं माप्यतः शृणु ।। ९८

---

१ अ देवता

एको लोभो महान्ग्राहो लोभात्पापं प्रवर्तते ।।
लाभात्क्रोधः प्रभवति लोभात्कामः प्रवर्तते ।। ९९

लोभान्मोहश्च माया च मानः स्तम्भः परेप्सुता[1] ।।
अविद्याऽप्रज्ञता चैव सर्वं लोभात्प्रवर्तते ।। १००

हरणं परवित्तानां परदाराभिमर्शनम् ।।
साहसानां च सर्वेषामकार्याणां क्रियास्तथा ।। १०१

स लोभः सह मोहेन विजेतव्यो जितात्मना ।।
दम्भो द्रोहश्च निंदा च पैशुन्यं मत्सरस्तथा ।। १०२

भवन्त्येतानि सर्वाणि लुब्धानामकृतात्मनाम्[2] ।।
सुमहांत्यपि शास्त्राणि धारयंति बहुश्रुताः ।। १०३

छेत्तारः संशयानां च लोभग्रस्ता व्रजंत्यधः ।।
लोभक्रोधप्रसक्ताश्च शिष्टाचारबहिष्कृताः ।। १०४

अन्तःक्षुरा वाङ्मधुराः कूपाश्छन्नास्तृणैरिव ।।
कुर्वते ये बहून्मार्गांस्तांस्तान्हेतुबलान्विताः ।। १०५

---

१ अ परेप्सुताः ब परासुता
२ अ जितात्मनाम्

सर्वमार्गं विलुंपंति लोभाज्जातिषु निष्ठुराः ।।
धर्मावितंसकाः[1] शुद्रा[2] मुष्णातिध्वजिनो जगत् ।। १०६

एते ऽति पापिनो ज्ञेया नित्यं लोभसमन्विताः ।।
जनको युवनाश्वश्च वृषादर्भिः प्रसेनजित् ।। १०७

लोभक्षयाद्दिवं प्राप्तास्तथैवान्ये जनाधिपाः ।।
तस्मात्त्यजंति ये लोभं ते ऽतिक्रामंति सागरम् ।। १०८

संसाराख्यमतो ऽन्ये ये ग्राहग्रस्ता न संशयः ।।
अथ ब्राह्मण भेदांस्त्वमष्टौ विप्रावधारय ।। १०९

मात्रश्च ब्राह्मणश्चैव श्रोत्रियश्च ततः परम् ।।
अनूचानस्तथा भ्रूण ऋषिकल्प ऋषिर्मुनिः ।। ११०

एते ह्यष्टौ[3] समुद्दिष्टा ब्राह्मणाः प्रथमं श्रुतौ ।।
तेषां परः परः श्रेष्ठो विद्यावृत्त विशेषतः ।। १११

ब्राह्मणानां कुलेजातो जातिमात्रो यदा भवेत् ।।
अनुपेतः क्रियाहीनो मात्र इत्यभिधीयते ।। ११२

---

१ अ सिकाः ब सकोः
२ ब क्षुद्रा
३ अ इत्थेति ष्टौ

एकोद्दिश्यमतिक्रम्य वेदस्याचार वार्भुजः ।।
स[1] ब्राह्मण इति प्रोक्तो निभृतः सत्यवागृधृणी ।। ११३

एकां शाखां सकल्पां च षाड्भिरंगैरधीत्य च ।।
षाट्कर्मनिरतो विप्रः श्रोत्रियोनाम धर्मवित् ।। ११४

वेदवेदांगतत्त्वज्ञः शुद्धात्मा पापवर्जितः ।।
श्रेष्ठः श्रोत्रियवान्प्राज्ञः सोऽनुचान इति स्मृतः ।। ११५

अनूचान गुणोपेतो यज्ञस्वाध्याय युंत्रितः ।।
भ्रूण इत्युच्यते शिष्टैः[2] शेषाभोगी जितेंद्रियः ।। ११६

[3]वैदिकं लौकिकं चैव सर्वज्ञानमवाप्य यः ।।
[4]आश्रमस्थो वशी नित्यमृषिकल्प इति स्मृतः ।। ११७

ऊर्ध्वरेता भवत्यग्रयो नियताशी असंशयी ।।
शापानुग्रहयोः शक्तः सत्यसंधो भवेदृषिः ।। ११८

निवृत्तः सर्वतत्त्वज्ञः कामक्रोध विवर्जितः ।।
ध्यानस्थो निष्क्रियो दांतस्तुल्य मृत्कांचनो मुनिः ।। ११९

---

१ ब सा
२ ब शिष्टो
३-४ ब प्रतो इत्ययं श्लोकः नास्ति । वैदिकं ...... यः ।।
आश्रमं ...... स्मृतः ।।

एवमन्वय विद्याभ्यां वृत्तेन च समुच्छ्रिताः ।।
त्रिशुक्ला[1]नाम विप्रेंदाः पूज्यन्ते सवनादिषु ।। १२०

इत्येवंविध विप्रत्वमुक्तं शृणु युगादयः ।।
[2]नवमी कार्तिके शुक्ला कृतादिः परिकीर्तिता ।। १२१

[3]वैशाखस्य तृतीया या शुक्ला त्रेतादिरुच्यते ।।
माघे पञ्चदशीनाम द्वापरादिः स्मृता बुधैः[4] ।। १२२

त्रयोदशी नभस्ये च कृष्णा सा हि कलेः स्मृता ।।
युगादयः स्मृता ह्येता दत्तस्याक्षयकारकाः ।। १२३

एतास्वतस्त्वस्तिथयो युगाद्याद्दत्तं हुतं चाक्षयमाशु विद्यात् ।।
युगेयुगे वर्षशतेन दानं[5] युगादिकाले दिवसेन तत्फलम् ।। १२४

युगाद्याः कथिता ह्येता मन्वाद्याः शृणु सांप्रतम् ।।
अश्वयुक्छुक्लनवमी द्वादशी कार्तिके तथा ।। १२५

तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ।।
फाल्गुनस्य त्वमावास्या पौषस्यैकादशी तथा ।। १२६

---

१ अ त्रिशुक्लाः
२ अ, ब पुरुषैः इत्ययं पाठः नास्ति । (नवमी ..... ता ।।)
३ अ, ब वैशाखस्य तृतीया या कृतस्यादिः प्रकीर्तिता ।।
कार्तिकस्यापि नवमी शुक्ला त्रेतादि रुच्यते ।।
(The underline words are missing in the printing works)
४ अ बुधैः
५ ब दत्तं

आषाढस्यापि दशमी माघमासस्य सप्तमी ।।
श्रावणस्याष्टमी कृष्णा तथाषाढी च पूर्णिमा ।। १२७

कार्तिकी फाल्गुनी चैत्री ज्येष्ठे[1] पञ्चदशी सिता ।।
मन्वंतरादयश्चैता दत्तस्याक्षय कारकाः ।। १२८

यस्यां तिथौ रथं पूर्वं प्रापदेवौ दिवाकरः ।।
सा तिथिः[2] कथिता विप्रैर्माघे या रथसप्तमी ।। १२९

तस्यां दत्तं हुतं चेष्टं सर्वमेवाक्षयं मतम् ।।
सर्वदारिद्र्यशमनं भास्कर प्रीतये मतम् ।। १३०

नित्यो द्वेजकमाहुर्यं बुधास्तं शृणुतत्त्वतः ।।
यश्च याचनिको नित्यं न स स्वर्गस्यभाजनम् ।। १३१

उद्वेजयति भूतानि यथा चौरास्तथैव सः ।।
नरकं याति पापात्मा नित्योद्वेगकरस्त्वसौ ।। १३२

इहोपपत्तिर्मम केन कर्मणा क्व च प्रयातव्यमितो मयेति ।।
विचार्य चैवं प्रतिकारकारी बुधैः स द्विजदक्षदक्षः ।। १३३

---

१ अ ज्येष्टी
२ ब तिथि

मासैरष्टभिरह्ना च पूर्वेण वयसायुषा ।।
तत्कर्म पुरुषः कुर्याद्येना ते[1] सुखमेधते ।। १३४

अर्चिर्धूमश्च मार्गौ द्वावाहुर्वेदांत[2] वादिनः ।।
अर्चिषा याति मोक्षं च धूमेनावर्तते पुनः ।। १३५

यज्ञैरासाद्यते धूमो नैष्कर्म्येणाऽर्चिरापूयते ।।
एतयोरपरो मार्गः पाखंड इति कीर्त्यते ।। १३६

यो देवान्मन्यते नैव धर्मांश्च मनुसूचितान् ।।
नै तौ स याति पंथानौ तत्त्वार्थौ यं निरूपितः ।। १३७

इति ते कीर्तिताः प्रश्नाः शकतया ब्राह्मणसत्तम ।।
साधु वाऽसाधु वा ब्रूहि ख्यापयात्मानमेव च ।। १३८

३. इति श्री स्कांदे महापुराण एकाशीति साहस्त्र्यां संहितायां प्रथमे माहेश्वरऽखंडे कौमारिकाखंडे कलापग्रामवासि सुतनुब्राह्मणेन नारद प्रश्नोत्तर कथनं नाम पंचमोऽध्यायः ।।

---

१ अ "सुखी येन स बुद्धिमान्" इति स्यात् ।

२ ब वेदांत

३ अ इति श्री स्कंदपुराण कुमारीकाऽखंडे द्वादश प्रश्न निरूपणं ।

ब इति श्री स्कंदपुराणे कुमारिकाऽखंडे प्रश्न कथनं नाम पंचमोध्यायः ।।